**शम्ब** पु० शम्ब-अच् । १वज्रे २मूसलाग्रस्थितलौहे मेदि० । ३लौहकाञ्च्यां हेमच० । ४अनुलोमकर्षणे भरतः । ५दरिद्रे च संक्षिप्तसा० ६भाग्यवति त्रि० रामाश्रमः ।

**शम्बर** न० शम्ब-अरन् । १जले २धने ३व्रते रत्नमा० । ४चित्ते च ५बौद्धव्रतभेदे हेमच० । ६मृगभेदे ७दैत्यभेदे पु० मेदि० ८मत्स्यभेदे ९पर्वतभेदे १०जिनभेदे पु० विश्वः । ११युद्धे पु० १२श्रेष्ठे त्रि० धरणिः १३चित्रकवृक्षे १४लोध्रे १५अर्जुनवृक्षे च पु० राजनि० । [राजनि० ।

**शम्बरकन्द** पु० शम्बरः श्रेष्ठः कन्दो यस्य । वाराहीकन्दे

**शम्बरचन्दन** न० ६त०। शम्बरपर्वतजाते चन्दनभेदे राजनि०

**शम्बरसूदन** पु० शम्बरमसुरं सूदयति छिनत्ति सुद-ल्यु । कामदेवे हला० तद्धननकथा हरिवं० १६३।१६४ अ० दृश्या ।

**शम्बरारि** पु०६त० । कामदेवे अमरः । शम्बररिपुादयोऽप्यत्र ।

**शम्बरी** स्त्री शम्बरं जलं बाहुल्येनास्त्यस्या अच् गौरा०ङीष् । १आखुपर्ण्यां मेदि० । २मायायां शब्दर० ।

**शम्बल** पु०न०शम्ब-कलच् । १कूले २पाथेये ३मत्सरे च मेदि०

**शम्बाकृत** त्रि० शम्बं कृष्टमप्यनुलोममाकृष्यते शम्ब+कर्षणार्थे डाच्+कृ-क्त । अनुलोमेन द्विरावृत्ते कृष्टे क्षेत्रे अमरः ।

**शम्बु (म्बू)** पुंस्त्री० शम्ब-उन् कू वा । १जलशुक्तौ (शामुक) हेमच० स्वार्थे क । तत्रार्थे । संज्ञायां कन् । गजकुम्भान्तभागे च । रामायणप्रसिद्धे शूद्रतापसे, शम्बूके हेमच० दैत्यभेदे च पु० ।

**शम्भ** त्रि० शमस्त्यस्य शम्+भ । कल्याणयुक्ते ।

**शम्भल** पु० शम्भं कल्याणदायकं तीर्थं लाति-ला क । १ग्रामभेदे यत्र कल्की भविष्यति तस्मिन् । २कुट्टिन्यां स्त्री अमरः गौरा० ङीष् ।

**शम्भु** पु० शम्+भू-डु । १महादेवे अमरः । २ब्रह्मणि ३वृद्धे मेदि० ४विष्णौ हला० ५सिद्धे शब्दर० । ६श्वेतार्के शब्दर० । [म्भुसुतादयोऽप्यत्र ।

**शम्भुतनय** पु० ६त० । १गणेशे २कार्त्तिकेये च शब्दमा० श-

**शम्भुप्रिया** स्त्री ६त० । १आमलक्यां हेमच० २दुर्गायाञ्च ।

**शम्भुवल्लभ** न०६त० । १श्वेतपद्मे राजनि० २महादेवप्रिये च

**शम्या** स्त्री शम-यत् टाप् । १युगकीलके अमरः । २दक्षहस्तदत्ततालभेदे संगीतदा० । [४निद्रायां ५पणे च विश्वः ।

**शय** पु० शी-अच् । १हस्ते अमरः । २सर्पे ३शय्यायां मेदि०

**शयथ** पु० शी-अथच् । १अजगरसर्पे २मृत्यौ ३निद्राशीले त्रि० हेमच० । ४वराहे ५मत्स्ये च पुंस्त्री०संक्षिप्तसारः ।

**शयन** न० शी-ल्युट् । १निद्रायां २शय्यायाम् अमरः ३मैथुने च मेदि० ।

देवभेदे शयनकालभेदादि वामनपु० १६अ० उक्तं यथा “मिथुनाभिगते सूर्ये शुक्लपक्षे तपोधन ! । एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् । शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् । कृत्वोपवीतकञ्चैव सम्यक् संपूज्य च द्विजान् । अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः । लब्ध्वा पीताम्बरधरं स्वस्ति निद्रां समानयेत् । त्रयोदश्यां ततः कामः स्वपते शयने शुभे । कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते । चतुर्दश्यां ततो यक्षाः स्वपन्ति सुखशीतले । सुवर्णपङ्कजकृते सुखास्तीर्णोपधानके । पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे । वैयाघ्रे च जटाभारं समुद्ग्रथ्यान्यचर्मणा । ततो दिवाकरे राशिं संप्रयाति च कर्कटम् । ततोऽमराणां रजनी भवते दक्षिणायनम् । ब्रह्मा प्रतिपदि तथा नीलोत्पलदलेऽनघ ! । तल्पे स्वपिति देवानां दर्शयन् मार्गमुत्तमम् । विश्वकर्मा द्वितीयायां तृतीयायां गिरेः सुता । विनायकश्चतुर्थ्यान्तु पञ्चम्यामपि धर्मराट् । षष्ठ्यां स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः । कात्यायनी तथाष्टम्यां नवम्यां कमलालया । दशम्यां भुजगेन्द्राश्च स्वपन्ति वायुभोजनाः । एकादश्यान्तु कृष्णायां साध्या ब्रह्मन् स्वपन्ति हि । एष क्रमस्ते गदितो निशायां शयने मुने ! । स्वपत्सु तेषु देवेषु प्रावृट्कालः समाययौ” ।

अथ लोकानां शयनप्रकारादि प्रदर्श्यते

“उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च । भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत् । शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत् । प्रागुदक्प्रवणे चैव संस्वपेत सदा बुधः । प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः । स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च । न चान्तर्ज्ञानहीने तु न तिर्य्यक् च कदाचन । शून्यालये श्मशाने तु एकवृक्षे चतुष्पथे । महादेवगृहे चापि मातृवेश्मनि न स्वपेत् । न यक्षनागायतने स्कान्दस्यायतने तथा । दर्भेषु च विना दीक्षां न स्वपेच्च कथञ्चन । धान्यगेहे च विप्राणां गुरूणाञ्च तथोपरि । नाशुचौ पर्णकीर्णे तु नाशुचिर्नाशिरस्कस्तथा । दिने सन्ध्यौ न नग्नश्च नोत्तरापरमस्तकः ।